# अभिज्ञानशाकुन्तलनाटकस्य चतुर्थाङ्केऽभिव्यक्ता रसभावाः

रीता ज्ञवाली, विद्यावारिधि*

(**लेखसारः** विख्यातस्य महाकवेः कालिदासस्य कृतिरभिज्ञानशाकुन्तलनाटकं रसमाधुर्या मर्मस्पृशां भावानां तदुपस्स्कारकाणामलङ्काराणां प्रसादगुणसंबलिताया वैदर्भीरीत्याश्च योगेन विश्वसाहित्य एव समुत्कृष्टं मन्यते। अस्य नाटकस्य चतुर्थोऽङ्कस्तत्राप्याधिक्येन रमणीयतरो मन्यते। तस्मिन् चतुर्थाङ्के के रसभावा व्यज्यन्त इत्यस्मिन् विषये बहवो मतभेदा दृश्यन्ते। अनेके समालोचकाः प्रकरणेऽस्मिन् करुणरसस्य स्थितिमामनन्ति। परमत्रेष्टनाशस्यानिष्टाप्तेश्चाभावाद् राज्ञा दुष्यन्तेन गान्धर्वेण विधिना ऊढाया आश्रमात् पतिगृहरूपं राजप्रासादं गच्छन्त्याश्च नायिकायास्तत्प्रकरणानुसारेण शोच्यताया अभावात् समुचितविभावाद्यनुपलब्धेश्च करुणरसो नाभिव्यज्यते। मुनीन्द्रविश्वनाथादिस्वीकृतस्य वत्सलरसस्य स्थितिरपि न सम्भाव्यते, प्रायः संस्कृतकाव्यतत्त्वज्ञैरन्यैराचार्यैस्तस्य सर्वथाऽस्वीकारात्। अतोऽभिज्ञानशाकुन्तलस्य चतुर्थाङ्के पितृनिष्ठा पुत्रीशकुन्तलाविषयिणी रतिरेव भावत्वेन प्रकरणद्योत्यतया व्यज्यमानास्ति। प्रबन्धव्यापिनि संयोगशृङ्गाररसे ह्यङ्गतां गच्छन्तो रौद्ररसोऽद्भुतरसो विप्रलम्भशृङ्गाररस औत्सुक्यचिन्तामोहस्मृतिमतिहर्षा व्यभिचारिणो भावत्वेन व्यज्यमानाः प्रकरणद्योत्यं पितृबन्ध्वादिचेतनगतमाश्रमस्थपशुपक्षिप्रकृत्यादिचेतनाचेतननिष्ठं शकुन्तलालम्बनं रतिरूपं भावं प्रमुखतया व्यञ्जयन्ति। भावोऽपि रस्यत इति व्युत्पत्त्याऽलक्ष्यक्रमतया च काव्यमुत्कर्षयतीति भावध्वनिरेवात्र चतुर्थाङ्के प्रकरणद्योत्यतयाऽभिव्यज्यमानो वर्तते।)

**शब्दकुञ्जी** – आलम्बनम्, विप्रलम्भः, प्रभुसम्मितः, प्रातिस्विकम्, अलक्ष्यक्रमः।

**विषयपरिचयः**

काव्यं किल कान्तासम्मितोपदेशयोजकतया प्रभुसम्मितोपदेशकृद्भ्यो वेदादिशास्त्रेभ्यो मित्रसम्मितोपदेशकृद्भ्यः पुराणादिशास्त्रेभ्यश्च विशिष्यते। तत्रापि नाट्यसाहित्यं दृश्यश्रव्योभयविधकलासंश्लिष्टं नानारसञ्च सद् जनसामान्यस्यापि हृदयं सहजतयाऽऽवर्जयति। नाटकेष्वपि विख्यातेन महाकविना कालिदासेन प्रणीतमभिज्ञानशाकुन्तलनाटकं विश्वसाहित्य एव समुत्कृष्टं मन्यते। अभिज्ञानशाकुन्तलस्य सप्तस्वङ्केषु चतुर्थाङ्को हि रसभावविशेषैर्जनमनांसि रञ्जयति। यद्यपि रसभावदृशा चतुर्थाङ्कस्य विशेषतया चित्तावर्जकत्वे नास्ति विदुषां समालोचकानां पाठकदर्शकाणाञ्च वैमत्यं परन्तु केचन समालोचकाश्चतुर्थाङ्के करु-

* उपप्राध्यापिका, साहित्यविभागे, नेपालसंस्कृतविश्वविद्यालयान्तर्गतस्य, विश्वविद्यालयविद्यापीठस्य, बेलझुण्डी–दाङस्थस्य
Email: jnawalir36nsu@gmial.com

णरसमामनन्ति परं संस्कृतकाव्यशास्त्रदृशा सूक्ष्मेक्षिकया पर्यालोचने करुणरसस्य स्थितिस्तत्र न दृश्यते। अतः संस्कृतकाव्यशास्त्रानुसारेण अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य रसभावानां विश्लेषणं लेखेनानेन प्रस्तूयते।

कालिदासप्रणीतस्याभिज्ञानशाकुन्तलनाटकस्य चतुर्थाङ्के के रसभावाः प्रामुख्येनाभिव्यज्यन्ते इत्यमुं प्राज्ञिकीं **समस्यां** सञ्चित्य लेखोऽयं प्रवृत्तोऽस्ति। अभिज्ञानशाकुन्तलनाटकस्य चतुर्थाङ्कगतानां रसभावानां विवेचनमस्य लेखस्य प्रमुखमुद्देश्यमस्ति।

**अध्ययनविधिः**

समाहृतानां तथ्यानां व्यवस्थापनं तु निगमनविश्लेषणविधिभ्यां विहितमस्ति। पादटिप्पणी सन्निवेशविधौ संस्कृते प्रचलितः पारम्परिणो विधिराधुनिकानां स्रोतसां सूचना तु  लेखकमितिपद्धतिना दत्तास्ति। अनयैव पद्धत्या सन्दर्भग्रन्थसूच्यपि न्यस्ता विद्यते।

**अनुसन्धानप्रकारः**

अध्ययनमिदं गुणात्मकं वर्तते। अत्र हि साहित्यशास्त्रे प्रतिपादितानां रसस्वरूपसम्बन्धिसिद्धान्तानामनुसारेण अभिज्ञानशाकुन्तलनाटकस्य चतुर्थाङ्केऽभिव्यक्तानां रसभावानां विश्लेषणं विधाय निष्कर्षः स्थापितो वर्तते।

**अनुसन्धानस्य क्षेत्रं सीमाङ्कनञ्च**

संस्कृतकाव्यशास्त्रस्य रसभावसिद्धान्तानाश्रित्य अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्यैव रसभावविवेचनमस्य लेखस्य मुख्यं क्षेत्रमस्तीति मूलतोऽस्य विषयक्षेत्रं साहित्यं विद्यते। आवश्यकानि प्रासङ्गिकानि स्थलानि विहाय चतुर्थाङ्कातिरिक्तोऽभिज्ञानशाकुन्तलनाटकभागान्तरं निश्चितरसभावातिरिक्ताश्च काव्यसिद्धान्ता अस्य लेखस्य सीम्नि नायास्यन्ति।

**तथ्याङ्कसङ्कलनं तत्साधनानि च**

पुस्तकान्येवाधृत्य प्रस्तुतस्यास्य शोधलेखस्य पुस्तकालयादेव सामग्र्यः समाहृत्य स्थापिताः।

**तथ्याङ्कविश्लेषणप्रक्रिया**

पुस्तकेभ्यः समाहृतानां तथ्यानां सविश्लेषणं काव्यशास्त्रीयं रससिद्धान्तं भावानां स्वरूपञ्च सम्यक्तया पर्यालोच्य तदाधृत्य च समीक्ष्यस्य ग्रन्थस्याभिज्ञानशाकुन्तलनाटकस्य चतुर्थाङ्कस्य सूक्ष्मेक्षिकया मीमांसां विधाय निष्कर्षः समुपस्थापितो विद्यते।

**सैद्धान्तिकपर्याधारः**

अभिज्ञानशाकुन्तलनाटकस्य चतुर्थाङ्केऽभिव्यज्यमानानां रसभावानां विश्लेषणार्थं पौरस्त्यकाव्यशास्त्रस्य रससिद्धान्त एवाऽऽधारतया गृह्यते। रसविशेषेषु विशेषतः स्पष्टतया प्रातिस्विकं रसलक्षणं वर्तत इति प्रामुख्येन विश्वनाथस्य साहित्यदर्पण एव पर्यालोचितोऽस्ति।

**पूर्वपक्षनिरूपणम्**

अभिज्ञानशाकुन्तलनाटकस्य व्याख्याकारेण कृष्णमणित्रिपाठिना स्वकीयस्य व्याख्याग्रन्थस्य भूमिकायामभिज्ञानशाकुन्तलस्य चतुर्थाङ्के शकुन्तलायाः स्वपतिगृहगमनप्रसङ्गे महाकविना मर्मस्पर्शीतया

करुणरसस्य चित्रणं विहितं वर्तते 'विषयविमुखोऽपि महर्षिः कण्वो रोदनं न जहाति' इत्यनेन तत्र करुणरसस्यैव प्रामुख्यं प्रतिपादितमस्ति।(त्रिपाठी, २००७ ई. : पृ. १३–१४।)

विदुषा रामचन्द्रमिश्रेणापि संस्कृतसाहित्येतिहासनामके ग्रन्थे 'शकुन्तलायाः प्रस्थानकाले कण्वस्य रोदनं सर्ववेद्यम्, सखीनां बाष्पोदयः सर्वानुमेयः परमचेतनायाः प्रकृतेः शोकावेगस्तु कालिदासेनैवावेक्षितः' इत्यनेन चतुर्थाङ्के करुणरसस्यैव प्रामुख्यत्वं द्योतितं वर्तते।(मिश्रः, १९९० ई. : पृ. १०५)

एवमेव मधुसक्सेनया कहाकविः कालिदास एवमभिज्ञानशाकुन्तलम् (कहाकवि कालिदास और अभिज्ञानशाकुन्तलम्) इति नामके ग्रन्थेऽभिज्ञानशाकुन्तलस्य रमणीयतायाः प्रतिपादनक्रमे चतुर्थाङ्के शकुन्तलाया पतिगृहप्रेषणप्रसङ्गस्य करुणरसस्यैव कारणत्वं प्रदर्शितमस्ति। (सक्सेना, १९८४ ई. : प्रथम खण्ड, पृ.११४) पुनः तत्रैव भागवतशरणोपाध्यामुद्धरन्त्या तया अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य प्रारम्भो रौद्ररसेन जातोऽस्ति परन्त्वसानं करुणसरेन इत्युल्लिखितमस्ति। (सक्सेना, १९८४ ई. : द्वितीय खण्ड पृ. ८३)

समालोचको रमेशचन्द्रशुक्लोऽपि प्रबन्धरत्नाकरनामके ग्रन्थे महाकवेः कालिदासस्य रसप्रयोगविषये चर्चां विदधानः 'करुणस्तु तस्य कवितायां कामपि अद्भुतामेव विच्छित्तिं बिभ्राणः पर्यवलोक्यते' इत्यनेन करुणरसस्योल्लेखं विधाय 'संसारविषयविमुखस्यापि कण्वस्य मनः शकुन्तलां स्वभर्तृगृहं गच्छन्तीं वीक्ष्य कियद् दूयते' इति समसूचयत्।(रमेशचन्द्रशुक्लः १९७८ ई. : पृ.२५९–२६०।)

## चतुर्थाङ्केऽभिव्यक्ता रसभावाः

अभिज्ञानशाकुन्तलनाटकस्य चतुर्थाङ्के महाकविना कालिदासेन स्वकीयायाः कल्पनाया अनुपमं रूपं प्रदर्शितम्। दुर्वाससः शापस्य कल्पनया तेन नायकस्य चरितं नाटकानुकूलतया धीरोदात्तत्वेन प्रस्तूय प्रख्याते तच्चरिते नवत्वमाहितम्। तत्रैव च पतिगृहं गच्छन्तीं शकुन्तलां प्रेक्ष्य न केवलं तपस्विन एव प्रत्युत तत्रत्याः पशुपक्षिणः किं बहुना लतावृक्षादयोऽचेतना अपि स्नेहोद्रेकाद् द्रवीभवन्ति। एभिरेव कोमलकान्तैर्भावैर्नाटकमिदं विश्वसाहित्येऽद्वितीयं मन्यते। अस्य चतुर्थाङ्कस्य प्रकरणद्योत्यतया प्रस्तुतानां रसभावानां विश्लेषणप्रसङ्गेऽत्र करुणरसो वर्तते न वेति प्रश्नश्चिन्तनपथमधिरोहति।

## करुणरसपर्यालोचनम्

बहवो विद्वांसोऽत्र शोकस्थायिभावं करुणरसमामनन्ति। परमेतस्मिन् विषये सूक्ष्मतया विचारणाऽपरिहार्या मन्यते। तत्र प्रथमं करुणरसस्य स्वरूपनिरूपणमावश्यकमस्ति। महामुनिना भरतेन – अथ करुणो नाम शोकस्थायिभावप्रभवः। स च शापक्लेशविनिपतितेष्टजनविप्रयोगविभवनाश–बधबन्धविद्रवोपघातव्यसनसंयोगादिभिर्विभावैः समुपजायते। (भरतमुनिः, २०५७ वि.सं. : प्रथमो भागः, पृ.३१३।) इत्यनेन शोकस्थायिभावकस्य करुणरसस्य शापादिभिर्विपद्गता इष्टाः तेषां विप्रयोगो विभवनाशो बन्धूनां वधबन्धनिर्वासनादीनि व्यसनानि विभावतां यान्तीति स्वीकृतं दृश्यते।

आचार्येण रुद्रटेनापि करुणरस इष्टस्य विनाशादनिष्टस्य वा लाभादुत्पन्नः शोकः स्थायी दुर्भाग्याद् आलम्बनं मृतं मन्वानो निरन्तरमश्रुपातविलापभूपतनभाग्यनिन्दादयोऽनुभावाः, मोहनिर्वेदादयो व्यभिचारिभावा भवन्तीत्युक्तम्। (रुद्रटस्य काव्यालङ्कारः ५।३–४।) आचार्येण धनञ्जयेनापि–

इष्टनाशादनिष्टाप्तौ शोकात्मा करुणोऽनुमतम्।
निःश्वासोच्छ्वासरुदितस्तम्भप्रलपितादयः।।
स्वापापस्मारदैन्याधिमरणालस्यसम्भ्रमाः।

विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः।।(दशरूपकम् ४।८१–८२)

इत्यनेन इष्टस्य नाशेनानिष्टस्य लाभेन वा समुत्पन्नः शोकः करुणस्य स्थायिभावतया स्वीकृतोऽस्ति।

आचार्यस्य विश्वनाथस्यानुसारेणेष्टस्य बान्धवादेर्नाशाद् अनिष्टस्य वाऽऽपतनात् करुणरसो निष्पद्यते। यमदेवताकस्य कपोतवर्णस्य च करुणरसस्य शोकः स्थायी मृतो विपद्गतो वा शोच्यो जनो विनष्टो वा विभवादिरालम्बनविभावः, शोच्यस्य बान्धवादेर्दाहो जीवितस्य कष्टान्युद्दीपनविभावो भाग्यनिन्दा भूमिपतनं क्रन्दनं वैवर्ण्यमुच्छ्वसननिश्वसनादिकं स्तम्भो विलाप इत्याद्याश्चानुभावाः निर्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमविषाद– जडतोन्मादचिन्ताद्या व्यभिचारिभावा भवन्ति।(साहित्यदर्पणः ३।२२२–२२५)

अभिज्ञानशाकुन्तलस्य चतुर्थाङ्के हि न क्वचिद् इष्टस्य जनस्य विभवस्य वा नाशो न वाऽनिष्टस्यापत्तिरस्ति। नेपथ्यान्तरितस्य दुर्वाससः शापे श्रूयमाणेऽपि शकुन्तलायाः सखीद्वयं विहायाऽऽश्रमवासिषु न शकुन्तला न कण्वो नाप्यन्यः कोऽपि शापवृत्तं जानाति। सख्यावनुसूयाप्रियंबदे अभिज्ञानदर्शनात् शापात् मुक्तेरुपायं दुर्वाससः सकाशादवगत्य विश्वस्ते शकुन्तला क्लिष्यतीति शापवृत्तं सर्वतो गोपायामासतुः। तत्कृतः प्रभावोऽपि लेशमात्रतोऽपि चतुर्थाङ्के न दृश्यते। अत्र हि करुणरसे स्वीकृतेऽपि तदालम्बनत्वेन शकुन्तलैव स्वीकर्तुं शक्यते। परं चतुर्थाङ्कस्यान्तं यावत् केनापि प्रकारेण तस्याः शोच्यत्वं न सिद्ध्यति। यतो हि या–

इदं किलाव्याजमनोहरं वपु–<br>
स्तपःक्षमं साधयितुं य इच्छति।<br>
ध्रुवं स नीलोत्पलपत्रधारया<br>
शमीलतां छेत्तुमृषिर्व्यवस्यति।।(अभिज्ञानशाकुन्तलम् १।१८)

इत्यनुसारेणात्यन्तं सुकोमलाऽप्याश्रमस्य कठोरैर्नियमैस्तपश्चरन्त्यासीत्। सम्प्रति स्वानुरूपं राजप्रासादं महिषीत्वेन गच्छन्ती विद्यते। अतस्तस्याः शोच्यता कथमपि न दृश्यते। गान्धर्वेण विधिना विवाहं विधाय शकुन्तला दुष्यन्तस्य गर्भं धृतवती। स च गर्भः कालान्तरे लोककल्याणाय भविष्यति–

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।<br>
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव।। (अभिज्ञानशाकुन्तलम् ४।४)

इतीमामाकाशवाणीं श्रुत्वा शकुन्तलाया धर्मपिता महर्षिः कण्वः सतोषं तां पतिगृहं प्रेषयितुं तत्परो भवति–

'दिष्ट्या धूमाकूलितदृष्टेरपि यजमानस्य पावक एवाहुतिः पतिता। वत्से सुशिष्यपरिदत्ता विद्येवाशोचनीया संवृत्ता। अद्यैव ऋषिरक्षितां त्वां भर्तुः सकाशं विसर्जयामि इति। (त्रिपाठी २००७ ई. : पृ.१७९) एतेनापि शकुन्तलायाः शोच्यत्वं न सिध्यति। यद्यपि पञ्चमाङ्के दुष्यन्तस्य प्रत्याख्यानान्तरामवश्यमेव षष्ठाङ्कात् पूर्वं शकुन्तलायाः शोच्यत्वमवश्यं दृश्यते। परं चतुर्थाङ्के दुर्वाससः शापानभिज्ञाः सर्वे शकुन्तलां पतिगृहं प्रस्थापयन्ति। कस्या अपि कन्यायाः सुयोग्यस्य सम्पन्नस्य प्रेमयुक्तस्य पत्युर्गृहगमनं कस्यापि बान्धवस्य कृते शोकाय न सम्भवति।

यद्यपि पण्डितराजेन जगन्नाथेन– पुत्रादिवियोगमरणादिजन्मा वैक्लव्याख्यचित्तवृत्तिविशेषः शोकः। (जगन्नाथः, प्रथमाननम्, २००३ ई. : पृ.१४१) इत्यनेन शोकलक्षणेन पुत्रादीनां वियोगेऽपि शोको भवती-

त्याख्यातम्। परमेष पुत्रादीनां विरहो भरतोक्तसरण्या विपन्नतायामेव शोकाय जायते। अत एव गुरुकुलं प्रत्यध्येतुं गतो रामः शोच्यतां नावहतीति शोकस्य विभावतां न याति परं राज्यामिषेकं परित्यज्य वनं गच्छन् रामो दशरथनिष्ठस्य शोकस्य विषयालम्बनतां प्रतिपद्यते। तेन पितृपुत्रादीनां बान्धवानां विरहो विपद्येव शोकस्य विभावो भवति न समुन्नतौ। आत्यन्तिके विरहे तु शोको भवत्येव।

आश्रमवासिनां शकुन्तलायाश्च मिथो विरहस्याऽऽसन्नत्वेऽपि विपद्गतस्याऽऽत्यन्तिकस्य वा विरहस्याभावात् करुणरसस्य स्थितिर्न दृश्यते। अत्र तु पूर्वमेव कण्वः समुचितं वरमन्विष्य शकुन्तलाया विवाहं कारयितुं वाञ्छति स्म। संयोगात् शकुन्तला गान्धर्वेण विधिना योग्यतमं वरं लब्धवतीत्याश्रमवासिनां समेषां प्रतिनिधिभूतः कुलगुरुः कण्वो हृष्टोऽस्ति–

संकल्पितं प्रथममेव मया तवार्थे
भर्तारमात्मसदृशं सुकृतैर्गता त्वम्।
चूतेन संश्रितवती नवमालिकेय–
मस्यामहं त्वयि च संप्रति वीतचिन्तः।। (अभिज्ञानशाकुन्तलम् ४।१३)

अत्र शोकस्य लेशोऽपि न दृश्यते प्रत्युत हर्षाख्यो व्यभिचार्येव प्राधान्येन व्यज्यते। तस्मादभिज्ञानशाकुन्तलस्य चतुर्थाङ्के शोकस्य स्थितिर्नास्त्येव।

**वत्सलो रसः**

महाकवेः कालिदासस्याभिज्ञानशाकुन्तलनाटकस्य चतुर्थाङ्के हि मुनीन्द्रविश्वनाथादिप्रतिपादितस्य वत्सलरसस्य स्थितिमपि सम्भावयितुं शक्यते। उक्तञ्च विश्वनाथेन— स्पष्टतया चमत्कारस्य विद्यमानत्वात् वत्सलरसो भवति। तस्य च वत्सलरसस्य वत्सलतास्नेहः स्थायिभावो भवति। पुत्रादय आलम्बनविभावाः तेषां चेष्टाविद्याशौर्यादय उद्दीपनविभावा आलिङ्गनाङ्गसंस्पर्शशिरश्चुम्बनपुलकानन्दबाष्पाद्याश्चानुभावा अनिष्टशङ्काहर्षगर्वादयो व्यभिचारिणो भवन्ति। (साहित्यदर्पणः ३।२५१–२५३।) यत्र मोहौत्सुक्यचिन्तावेगादिव्यभिचारिभिराशीर्वचनशुभशंसावस्तुप्रदानादिभि– रनुभावैः पोषितः कण्वप्रभृत्याश्रमवासिनिष्ठः शकुन्तलाविषयकः स्नेहो वत्सलरसत्वेन सहृदयहृदयेष्वभिव्यज्यते। परं वत्सलस्य रसत्वं कांश्चिदेवाचार्यान् विहायान्यैर्न स्वीक्रियते।

पण्डितराजेन जगन्नाथेन हि शृङ्गारादिशान्तान्तान् नव रसान् विहायान्येषां भक्तिवत्सलादीनां रसानां निरासो विहितः– रसानां नवत्वगणना च मुनिवचननियन्त्रिता भज्येत, इति यथाशास्त्रमेव ज्यायः।(रसगङ्गाधरः २००३ ई. : प्रथमाननम् पृ.१९२)

चतुर्थाङ्केऽभिव्यज्यमानाः सर्वेऽपि रसभावा अन्ते संयोगशृङ्गारे पर्यवसन्तीति तदङ्गभूता एव विद्यन्ते। एवञ्च प्रबन्धव्यापिनः संयोगशृङ्गारस्याऽङ्गतया विप्रलम्भशृङ्गाररसस्य रौद्रस्याद्भुतस्य मुख्यतया भावध्वनेश्चाभिव्यञ्जनं चतुर्थाङ्के लक्ष्यते।

**विप्रलम्भशृङ्गारः**

विप्रलम्भशृङ्गाररसस्य स्वरूपं विश्वनाथेनेत्थं प्रतिपादितम्– यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोसौ। (साहित्यदर्पणः ३।१८७) शकुन्तलामभिशपत ऋषेर्दुर्वाससः –

विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम्। (अभिज्ञानशाकुन्तलम् ४।१)

इति वचनेन शकुन्तलानिष्ठा दुष्यन्तविषयिणी रतिरुभयोराश्रयविषयभूतयोरालम्बनयोर्वियुक्तत्वाद् विप्रलम्भशृङ्गाराख्यो रसोऽभिव्यज्यमानोऽस्ति। स च सख्योरनुसूयाप्रियंवदयोः संवादेनापि व्यक्तो भवति। तत्रैव कण्वशिष्यस्य–

अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा।
इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्रसुदुःसहानि।। (अभिज्ञानशाकुन्तलम् ४।३)

इति वाक्येनापि विप्रयुक्तायाः शकुन्तलाया दुःसहाया विरहवेदनायाः संसूचनेन विप्रलम्भशृङ्गारस्य स्थितिः संपोष्यते। एष च प्रसङ्गो नैकेन वाक्येन द्योत्यते परन्तु प्रकरणव्याप्येव वर्तत इति प्रकरणद्योत्योऽयम– संलक्ष्यक्रव्यङ्ग्यध्वनिर्विप्रलम्भशृङ्गाररूपो वर्तते।

**रौद्ररसः**

आचार्यस्य विश्वनाथस्यानुसारेण रौद्ररसे क्रोधः स्थायिभावो भवति। रक्तवर्णस्य रुद्रदैवतस्यास्य रसस्य अरिरालम्बनम्, तच्चेष्टोद्दीपनम्, मुष्टिप्रहारपातनविष्कृतच्छेदावदारणसंग्रामसंभ्रमादयोऽनुभावाः, उग्रतावेगरोमाञ्च– स्वेदवेपथुमदमोहामर्षादयश्च व्यभिचारिणो भवन्ति। (साहित्यदर्पणः ३।२२७–२३०) प्रकृते च अभिज्ञानशाकुन्तलनाटकस्य चतुर्थाङ्के दुष्यन्तमेव स्मरन्त्याः शकुन्तलायाः पर्णकुटीरे भिक्षार्थमृषिर्दुर्वासाः समायाति। तस्य भिक्षानिमित्तं वचनं श्रोतुं सा न प्रभवति। ऋषिस्तु आत्मनोऽवहेलनां मन्वानः शकुन्तलां शपति–

विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव।। (अभिज्ञानशाकुन्तलम् ४।१)

अत्र हि आवेगौग्र्याभ्यां व्यभिचारिभ्यां पोषित उपेक्षादिनोद्दीपितः शापवचनानिर्गमनादिनाऽनुभावितः शकुन्तलाविषयको दुर्वासनिष्ठः क्रोधस्थायी रौद्ररसरूपतां प्राप्नोति।

**अद्भुतरसः**

पीतवर्णके गन्धर्वदैवतकेऽद्भुतरसे विस्मयः स्थायी अलौकिकवस्त्वालम्बनम्, तस्य गुणकीर्तनमुद्दीपनम्, स्तम्भस्वेदरोमाञ्चगद्गदसंभ्रमनेत्रविकासादयोऽनुभावाः वितर्कावेगसंभ्रान्तिहर्षाद्या व्यभिचारिणो भवन्ति।(-साहित्यदर्पणः ३।२४२–२४५) शाकुन्तलस्य चतुर्थाङ्के च पतिगृहं यान्त्यां शकुन्तलायामाश्रमस्था वृक्षा अपि चेतनवद् वस्त्राभरणान्युपहरन्तो दृश्यन्ते–

क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित्।

अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै–
दर्त्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः।। (अभिज्ञानशाकुन्तलम् ४।५)

अत्र हि अचेतनैवृक्षैर्बहुमूल्यवस्त्राभरणप्रसाधनसामग्र्याद्युपायनीकरणमालम्बनविभावो मुनिशिष्यादीनां नेत्रविस्फारणादिकमनुभावो हर्षौत्सुक्यादयो व्यभिचारिण एतैर्व्यक्तो विस्मयाख्यः स्थायी अद्भुतरसरूपतां प्रतिपद्यते। स च वृक्षादिनिष्ठां शकुन्तलाविषयिणीं रतिमुपस्कुरुते।

**भावाः**

भावा हि संस्कृतकाव्यशास्त्रे द्विधा परिभाषिता दृश्यन्ते। तत्र प्रथमं हि आस्वादरूपतया रसस्य समानान्तररूपेण देवादिविषया रतिरञ्चितव्यभिचारिणश्च भावसंज्ञया व्यपदिष्टाः सन्ति। द्वितीयं किल एतेषामेव रत्यादीनां स्थायिनां निर्वेदग्लान्यादिव्यभिचारिणाञ्च रसोपकरणतया समुल्लेखो दृश्यते। अत्र तु देवादिविषयकरतिरूपभावस्य प्राधान्येन व्यक्तस्य व्यभिचारिरूपभावस्य च दृशा विवेचनं विधीयते। अभिज्ञानशाकुन्तलनाटकस्य चतुर्थाङ्के देवादिविषयकरतिरूपो भावः प्रधानतया पुरस्कृता व्यभिचारिणश्च प्रामुख्येन प्राचुर्येण च व्यक्ताः सन्ति। महर्षि कण्वः शकुन्तलायाः स्नेहातिरेकेणाऽऽसन्नविरहेण च व्याकुलो दृश्यते –

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः।। (अभिज्ञानशाकुन्तलम् ४।६)

अत्र हि केचन करुणरसमामनन्ति परन्त्वाऽऽसन्नविरहजमोहचिन्तौत्सुक्यैर्व्यभिचारिभिः पुरस्कृता पितृनिष्ठा पुत्रीविषयिणीरतिरेव मुख्यतया व्यज्यमाना आस्वादपदवीमधिरोहतीति भावध्वनिरेवात्र विद्यते। तच्च सर्वं स्नेहादित्यनेन सुव्यक्तं भवति।

पितुर्विरहवैक्लव्यमनुभवन्तीं शकुन्तलां कण्वो बोधयति–

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि।। (अभिज्ञानशाकुन्तलम् ४।१९)

अत्र कविना शुच्शब्दस्य प्रयोगेण शोकस्य स्थितिर्निर्दिष्टेति शोकस्थायी करुणरसो व्यज्यत इति न वाच्यम्, तदनुकूलविभावादीनामभावात्। किञ्च–

शममेष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्वम्।
उटजद्वारविरूढं नीवारबलिं विलोकयतः।। (अभिज्ञानशाकुन्तलम् ४।२१)

किञ्च अत्र शोकशब्दस्य प्रयोगेऽपि व्यभिचारिभावस्थायिभावानां स्ववाचकशब्दैरभिधानेऽपि समुचितसामग्र्याभावाद् शोको नाभिव्यज्यते प्रत्युत विशेषाभिप्रायं विना व्यभिचारिणां स्थायिनां रसानाञ्च स्वशब्दाऽभिधाने दोषः सम्पद्यते।(काव्यप्रकाशः ७। ६०–६२) अत एवात्र स्मृतिव्यभिचारिपोषिता पितृकण्वनिष्ठा पुत्रीशकुन्तलाविषयिणी रतिरेव भावत्वेनाऽभिव्यज्यते। सामान्यतया शृङ्गारकरुणयोः परस्परविरोधित्वात्

करुणस्य शृङ्गाराङ्गत्वमपि नोपपद्यते स्मृतित्वेनोपस्थितः शृङ्गारस्तु कदाचित् करुणस्याङ्गत्वं प्रतिपद्यते। उक्तञ्चानन्दवर्धनेन– 'वाक्यार्थीभूतस्यापि कस्यचित्करुणरसविषयस्य तादृशेन शृङ्गारवस्तुना भङ्गिविशेषाश्रयेण संयोजनं रसपरिपोषायैव जायते। यतः प्रकृतिमधुराः पदार्थाः शोचनीयतां प्राप्ताः प्रागवस्थाभाविभिः संस्मर्यमाणैर्विलासैरधिकतरं शोकावेशमुपजनयन्ति।

यथा– अयं स रशनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः।।' ( आनन्दबर्धनः २००३ ई. : पृ. ४१३) इत्यादौ।

अत एव प्रसङ्गेऽस्मिन् उभयोरपि पद्ययोः शोकशब्द इष्टनाशानिष्टावाप्त्योरभावात् न करुणस्थायी प्रत्युत स्मृतिपोषितस्य पुत्रीशकुन्तलाविरहजन्यस्य मोहस्याभिव्यञ्जक इति स्मृतिमोहाभ्यां व्यभिचारिभ्यां पितृकण्वनिष्ठा पुत्रीशकुन्तलाविषयिणी पुत्रीनिष्ठा पितृविषयिणी च रतिरेव भावत्वेन व्यज्यमानास्ति 'रतिर्देवादिविषया व्यभिचारी तथाञ्जितः। भावः प्रोक्तः। (काव्यप्रकाशः ४।३५–३६।) इत्यत्र देवादिविषयेति पदे आदिपदेन गुरुमुनिपितृमातृपुत्रपुत्र्यादीनां ग्रहणात्।

अथ च प्रणम्य पतिगृहं प्रस्थातुमुद्यतां शकुन्तलां कण्व आशिभिर्योजयन् कथयति–

ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि।। (अभिज्ञानशाकुन्तलम् ४।७)

पत्युः प्रेमा योग्यतमस्य पुत्रस्य मातृत्वमिति द्वयमपि स्त्रीणामतिशयोत्कर्षाय कल्पते। एनेनाऽऽशीर्वचनेनापि पितृपुत्र्योः स्नेहातिशय एव द्योत्यते। ऋषिः कण्वश्चाश्रमस्थलतावृक्षेषु शकुन्तलायाः प्रेमातिशयं संस्मृत्यताननुज्ञां याचते –

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या वल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।। (अभिज्ञानशाकुन्तलम् ४।९)

अत्र हि स्मृत्याख्येन व्यभिचारिभावेन पुष्टः शकुन्तलाश्रमस्थवृक्षाणां मिथो रतिभाव एव व्यज्यमानो दृश्यते। पतिगृहमित्यनेन चानुज्ञौचित्यसाधनपूर्वकं गर्वाख्यो व्यभिचारिभावोऽपि द्योत्यते। वनदेव्योऽपि प्रकृतेरानुकूल्यं विभाव्य शुभाशंसां प्रयच्छन्ति –

रम्यान्तरः कमलिनीहरितैः सरोभि-
श्छायाद्रुमैर्नियमितार्कमयूखनापैः।
भूयात्कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः।। (अभिज्ञानशाकुन्तलम् ४।११)

पशुपक्षिणोऽर्धजग्धं ग्रासमपि मुक्त्वा नर्तनं विहाय नैजं वैक्लव्यं दर्शयन्ति। लता अपि पाण्डुपत्राणि मुञ्चन्त्यः विरहकातरा अत एव क्रन्दन्त्य इव लक्ष्यन्ते–

उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः।। (अभिज्ञानशाकुन्तलम् ४।१२)

शकुन्तलया प्रेम्णा पालितो मृगशावकः स्नेहाधिक्येन मार्गमवरुणद्धि–

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते।। (अभिज्ञानशाकुन्तलम् ४।१४)

उपर्युक्तयोर्द्वयोरेव पद्ययोर्भावस्य तिर्यग्योनिगतत्वाद् भावाभासो विद्यते। अङ्कस्यान्ते हि महर्षिः कण्वः स्नेहोद्रेकेण पालितां धर्मपुत्रीं शकुन्तलां योग्यतमस्य यजमानस्य पत्युर्दुष्यन्तस्य राजप्रासादं प्रति विसृज्य सन्तोषमनुभवति–

अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा।। (अभिज्ञानशाकुन्तलम् ४।२२)

अत्र निक्षेपतुल्यां परगृह एव प्रेषणीयां कन्यां तदीयस्य पत्युर्गृहं सम्प्रेष्य विशदान्तरात्मा जातोऽस्मीत्यनेन गर्वमतिहर्षाणां व्यभिचारिणां व्यञ्जनं मुख्यतया सञ्जायत इति 'व्यभिचारितथाञ्जितः' इति काव्यशास्त्रानुसारेण भावो व्यज्यते।

**निष्कर्षः**

एवञ्चाभिज्ञानशाकुन्तलनाटकस्य चतुर्थाङ्क इष्टनाशस्यानिष्टापत्तेश्च सर्वथाऽभावात् कठोरतरतपःसाध्याद् तपोवनाद् स्वयं प्रेम्णा वृतस्य प्रेमवतः पत्युर्गृहं राजप्रासादं प्रति गच्छन्त्याश्च विभावरूपायाः शकुन्तलायाः सर्वथा शोच्यत्वाभावात् करुणरसो नास्ति। वत्सलस्य रसस्य स्थितौ दृश्यमानायामपि प्रायः काव्यशास्त्रिभिस्तस्य रसत्वेनानङ्गीकारात् वत्सलो रसोऽत्र व्यज्यत इत्यपि न शक्यते वक्तुम्। अतोऽस्य नाटकस्य चतुर्थाङ्के प्रकरणव्यापितया पुत्रीविषयिणी रतिरेव भावत्वेन व्यज्यमाना विद्यते। प्रारम्भे रौद्ररसस्य विप्रलम्भशृङ्गारस्याद्भुतस्य रसस्य स्थितिरप्यत्र न्यूनाधिक्येन विद्यमाना दृश्यते। प्रामुख्येन व्यज्यमाना औत्सुक्यचिन्तामोहस्मृतिमतिहर्षादयो व्यभिचारिणो भावत्वेन व्यज्यमानाः सन्तः प्रकरणव्यापित्वेन विद्यमानां पुत्रीविषयिणीं रतिमेव भावत्वेनोपस्कुर्वन्तीति भाव एवात्र प्रकरणद्योत्यासंलक्ष्यक्रमव्यङ्ग्यध्वनित्वेन मुख्यतया व्यज्यमानो दृश्यते। यो हि प्रबन्धद्योत्ये संयोगशृङ्गारे पर्यवस्यति। इति शम्।

**कृतज्ञताज्ञापनम्**

येषां विदुषां ग्रन्थेभ्यः प्रामाण्यं समुद्धृतं येषां प्रेरणाभिर्लेखेऽस्मिन् मतिर्जाता यैर्लेखस्यास्य समीक्षणं विधाय प्रकाशनार्हता अङ्गीकृता यैश्चायं लेखः प्रकाशतां नीतः ते सर्वे साभिवन्दनं कृतज्ञताभिः सम्मान्यन्ते।

**सन्दर्भग्रन्थाः**

आनन्दवर्धनः (२००३ ई.), *ध्वन्यालोकः* चौखम्बा विद्याभवन।

कालिदासः (२००७ ई.), *अभिज्ञानशाकुन्तलम्*, व्या. कृष्णमणि त्रिपाठी, चौखम्बा सुरभारती प्रकाशन।

आनन्दबर्धनः (२००३ ई.), *ध्वन्यालोकः* , चौखम्बा विद्याभवन।

जगन्नाथः (२००३ ई.), *रसगङ्गाधरः* (प्रथमाननम्), चौखम्बा विद्याभवन।

मम्मटः (२००४ ई.), *काव्यप्रकाशः*, ज्ञानमण्डललिमिटेड।

मिश्रः, रामचन्द्रः (१९९० ई.), *संस्कृतसाहित्येतिहासः*, चौखम्बा विद्याभवन।

रुद्रटः (२०२३ वि.सं.), *काव्यालङ्कारः*, चौखम्बा विद्याभवन।

विश्वनाथः (२००० ई.), *साहित्यदर्पणः*, मोतीलाल वनारसीदास।

शुक्लः, बाबूलालः (सं.) (२०५७ वि.सं.), *नाट्यशास्त्रम्* (प्रथमो भागः तृ.सं.), चौखम्बा संस्कृत संस्थान।

शुक्लः, रमेशचन्द्रः (१९७८ ई.), *प्रबन्धरत्नाकरः*, चौखम्बा विद्याभवन।

सक्सेना, मधु (१९८४–८५ ई.), *महाकवि कालिदास और अभिज्ञानशाकुन्तलम्*, मानसी प्रकाशन।

सुधाकर, मालवीयः(सं)( १९७९ ई.), *दशरूपकम् धनञ्जयरचितम्*, चौखम्बा अमरभारती प्रकाशन।